# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर/ दिसम्बर, २०१६

कक्षा – शास्त्रियतृतीयवर्षम् (SEM-5) **प्रश्नपत्रम् – ७** गुणाः – ७०

विषयः – फलितज्योतिषम् **कोड – C.E.3.5.9** समयः – ११:००-०२:००

दिनाङ्कः – १-१२-२०१६ सन्दर्भग्रन्थः – पञ्चस्वरा: लघुजातकम्

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु कयोश्चिद् द्वयोः सप्रसंगं व्याख्यां कुरुत।** ०८

(१) वेदपञ्चनखान्दत्वा बह्न्यष्ट समयं तथा।
भुवनं युगलंञ्चैव दश देयास्तथैव च॥

(२) कर्के धनुषि मीने च हरिकीटघटेषु च।
कन्या मकर युकेषु तुलामीनाङ्गनासुच ॥

(३) भूवर्षे हि बृहस्पतिनिगदितं सार्द्धद्वयं भास्करे।
पादं वासरयुग्मकं मृगतनो पक्षत्रयं भूमिजे।
षड् विंशानि दिनानि दानवगुरोर्द्वाविंशरात्रि बुधे
षड् मासं ससमामितं बिधुरिपोर्मासं तथा भास्करे॥

**प्रश्नः – २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्य उपरि निबन्धं निबन्धयत।** ०८

(१) वेधप्रकार: (२) बालारिष्टसमयज्ञानम्।

**प्रश्नः – ३ निम्नलिखितेषु टिप्प्पणीद्वयं लिखत।** ०४

(१) अरिष्टप्रमाणम्
(२) ग्रहाणां राशिभोगकाल:
(३) वधैक्यांकविचार:
(४) ग्रन्थानुसारं शनिफलविचार:

**प्रश्नः – ४ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) कुज: कति दिवसपर्यन्तं एकस्मिन् राशौ तिष्ठति?
(२) त्रिपताकिचक्रे याम्योत्तररेखा: कति लेख्या:?
(३) पञ्चस्वराग्रन्थस्य लेखक: क:?
(४) त्रिपताकिचक्रे कुम्भराशे: कति संख्या लेख्या?
(५) ग्रन्थानुसारं शीघ्रग्रहा: के?
(६) शुभखेटा: के ?
(७) शुक्रस्य उच्चराशि: क: ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत।।** ०८

(१) षड्भिर्भक्त्वा तिथिर्ग्राह्या वारो ग्रह्याश्च सप्तभि: ।
पक्षेन्दु शेषिते लग्नं घटीभिश्च घटीं वदेत्॥

(२) अष्टमस्थो यदा पाप: सौम्यश्चेद्वादशो स्थित:।
तदा मृत्यु व्रजेदेव देवराज समो यदि॥

(३) शनिगेहे यदा राहु: शशि सिंहे भवेद्यदि।
शिरश्छेदाख्ययोगोऽयं विष्णुना परिकिर्त्तित ।

**प्रश्नः – ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।** ०८

(१) निधनस्य षोडशयोगा::  (२) कुम्भमीनस्य द्रेष्काणफलम्

**प्रश्नः – ७ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) मृत्युकथने तिथ्यादिज्ञानम्  (३) मिथ्यावादीयोग:

(२) समात्रामरणयोग:  (४) जारजातभङ्गकथनम्

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) चन्द्रस्य होरा कदा भवति ?  (५) कण्टकसंज्ञा कस्य स्थानस्य अस्ति ?

(२) जलजन्तुभि: कदा हन्यते ?  (६) जात: गोवधी कदा भवति ?

(३) सूर्यचन्द्रौ अरिभावस्थौ चेत् किं फलम्?  (७) शुक्रवत्सरस्य किं फलम्?

(४) पापग्रहस्य महादशायां एवं तस्यैव अन्तर्दशायां अरियोगे किं फलम्?

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत।।** ०८

(१) पुंस्त्री-क्रुराऽक्रुरौ चर-स्थिर-द्विस्वभावसंज्ञश्च।
अजवृषमिथुनकुलीरा: पंचनवमै: सहैन्द्रयाद्या:॥

(२) मेषाद्यश्चत्वार: सधन्विमकरा: क्षपाबला: ज्ञेया:।
पृष्ठोदया विमिथुना: शिरसान्ये ह्युभयतो मीना:॥

(३) क्षीणेन्द्वौ द्वादशगे लग्नाष्टमराशिसंस्थितै: पापै:।
सौम्यरहिते च केन्द्रे सद्यो मृत्युर्विनिर्देश्य॥

**प्रश्नः – १० अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।** ०८

(१) लग्नायुसाधनम्।  (२) अरिष्टभंगविचार:।

**प्रश्नः – ११ निम्नलिखितयोः कस्यचिदेकस्य उपरि टिप्पणीं लिखत।** ०२

(१) केन्द्रादिसंज्ञा

(२) लग्नेशकृदरिष्टभंगयोग:

**प्रश्नः – १२ अधोलिखितेषु कयोश्चिद् द्वयोःअतिलघूत्तरं लिखत।** ०२

(१) द्विपादराशय: के ?  (३) चन्द्रस्य मित्रग्रहा: के ?

(२) दीवाबली राशय: के ?  (४) अपचयस्थनानि कानि ?

***